द्वमःशमः” इत्युपक्रम्य “भवन्ति भावा भूतानां मत्तएव पृथग्विधा” इति गीतायां तेषां भावरूपत्वोक्तेः अयथार्थ-ज्ञानपरत्वम् न०ब०। २तच्छून्ये स्थिरप्रज्ञे त्रि०।

**असम्यच्** त्रि० न०त०। सम्यगभिन्ने १अनुचिते २अयुक्ते। “असम्यग्व्यवशीलैस्तैः” देवीमा०। स्त्रियां ङीप् असमीची

**असरु** पु० सरति सृ—उन् न०त०। (कुकुरसोङ्गा) वृक्षे

**असल** न० असते’ क्षिप्यतेऽनेन अस+कलच्। अस्त्रक्षेपो-पयुक्ते १मन्त्रभेदे २लौहे च।

**असवर्ण** त्रि० न सनानो वर्णोऽस्य समानस्य सादेशः। असजातीये भिन्नवर्णे यथा ब्राह्मणस्य क्षत्रियादिः। “द्विजानामसवर्णासु कन्यासूपयमस्तथा” बृहन्ना०।

**असश्चत्** त्रि० सश्चतिर्गत्यर्थः निरु०सश्च—शतृ न०त०। १अगम-नशीले स्त्रियां ङीप् “अस्य प्रजावती गृहेऽसश्चन्ती” ऋ० ८।३१।४। “असश्चन्ती अगमनशीला” भा०। २अपराजिते च “मधुजिह्वा असश्चतः” ऋ०६।७२।४। “असश्चतः अपराजितान्” भा०।

**असश्चुस्** त्रि० सश्च—वा उसुन् न०त०स्त्रियां ङीप्। अप्रतिबद्धे “यानो दोहते त्रिरहन्नसश्चुषी क्षुमत्” ऋ०६।८६।१८। “असश्चुषी अप्रतिबद्धा” भा०।

**अससत्** त्रि० सस—स्वप्ने शतृ न०त० स्त्रियां ङीप्। स्वव्यापारे जागरूके “रेजन्ते अससन्तो अजराः” ऋ० १।१४३।३। “अससन्तः स्वव्यापारेष्वस्वपन्तः” भा०।

**असह** त्रि० न सहते सह—अच् न०त०। अक्षमे असहने

**असहन** पु० न सहति सह—ल्यु न०त०। १शत्रौ। २क्षमा-शून्ये त्रि०। भावे ल्युट् अभावे न०त०। ३क्षमाभावे

**असहाय** त्रि० नास्ति सहायोयस्य। १सहचरशून्ये अन्य-साहाय्यरहिते २सङ्गरहिते च “कपालं वृक्षमूलानि कुचेलमसहायता। समता चैव सर्व्वस्मिन्नेतन्मुक्तस्य लक्षणम्,” मनुः। [“स्वजनबन्धुजनेष्वसहिष्णुता” नीतिः

**असहिष्णु** त्रि० न सहिष्णुः। अक्षमे सहनशीलभिन्ने

**असह्य** त्रि० न सह्यः। सोढुमशक्ये “असह्यपीड़ं भगवन् ऋणमन्त्यमवेहि मे” “द्विषामसह्यः सुतरां तरूणाम्” इति च रघुः। “नववैधव्यमसह्यवेदनम्” कुमा०।

**असाक्षात्** अव्य० न०त०। १परोक्षे २इन्द्रियायोग्ये च।

**असाक्षात्कार** पु० अभावे न०त०। १प्रत्यक्षाभावे विरोधे न०त०। २ परोक्षज्ञाने न०ब०। ३ प्रत्यक्षाविषये ४तच्छून्ये च त्रि०।

**असाक्षिक** त्रि० नास्ति साक्षी साक्षाद्द्रष्टा अधिष्ठाता वा यस्य कप्। १साक्षिशून्ये “असाक्षिकेषु त्वर्थेषु मिथोवि वदमानयोः” मनुः। २अधिष्ठातृशून्ये च असाक्षिका जड़प्रवृत्तिरनुचितेति वेदा०प्रक०।

**असाक्षिन्** त्रि० न साक्षी। स्मृत्युक्ते वचनतो दोषादितोवा साक्ष्यकर्म्मसु अयाह्ये श्रोत्रियादौ। असाक्षिणश्च मिता० दर्शिताः “उक्तलक्षणानां साक्षिणामसम्भवे प्रतिषेधरहि-तानामन्येषामपि साक्षित्वप्रतिपादनार्थमसाक्षिणो वक्तव्याः ते च पञ्चविधा नारदेन दर्शिताः “असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः। वचनाद्दोषतोभेदात्स्वयमुक्ति-र्मृतान्तर” इति। के पुनर्वचनादसाक्षिण इत्याह। “श्रोत्रियास्तापसा वृद्धा ये च प्रव्रजितादयः। असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः” या०स्मृ० तापसावानप्रस्थाः। आदिशब्देन पितृविवदमानादीनां ग्रहणम्। यथाह शङ्खः। “न पितृविवदमानगुरुकुलवासिपरिव्राजकवान प्रस्थनिर्ग्रन्थयः साक्षिण”इति दोषादसाक्षिणो दर्शिता नारदेन “स्तेनाः साहसिकाश्चण्डाः कितवा वञ्चकास्तथा। असाक्षिणस्ते दुष्टत्वात्तेषु सत्यन्न विद्यत”इति। चण्डाः कोपनाः कितवाद्यूतकृतः। भेदादसाक्षिणाञ्च स्वरूपन्तेनैव दर्शितम्। “साक्षिणां लिखितानां च निर्दिष्टानाञ्च वादिना। तेषामेकोऽन्यथा वादी भेदात्सर्वे न साक्षिण” इति। तथा स्वयमुक्तिस्वरूपञ्चोक्तम्। “स्वयमुक्तिरनिर्द्दिष्टः स्वय-मेवेत्य यो वदेत्। सूचीत्युक्तः सशास्त्रेषु न स साक्षित्वमर्ह तीति”। मृतान्तरस्यापि लक्षणमुक्तम्। “योऽर्थः श्रावयि-तव्यः स्यात्तस्मिन्नसति चार्थिनि। क्व तद्वदतु साक्षित्व मित्यसाक्षी मृतान्तर” इति। येनार्थिना प्रत्यर्थिना वा साक्षिणां योऽर्थः श्रावयितव्यो भवेत् यूयमत्रार्थे साक्षिण इति। तस्मिन्नर्थिनि प्रत्यर्थिनि वा असति मृतेऽर्थे च अनिवेदिते साक्षी क्व कस्मिन्नर्थे कस्य वा कृते साक्ष्यं वद-त्विति मृतान्तरः साक्षी न भवति। यत्र तु मुमूर्षुणा स्वस्थेन वा पित्रा पुत्रादयः श्राविताः अस्मिन्नर्थे अमी साक्षिण इति। तत्र मृतान्तरोपि साक्षी। यथाह नारदः। “मृतान्तरोऽर्थिनि प्रेते मुमूर्षुश्रावितादृते”। तथा “श्रावितोऽनातुरेणापि यस्त्वर्थो धर्मसंहितः। मृतेऽपि तत्र साक्षी स्यात् षट्सु चान्वाहितादिषु”। तानेतानसाक्षिणो दर्शयति। “स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः” रङ्गावतारिपाषण्डिकूटकृद्विकलेन्द्रियाः। पतिताप्तार्थ-सम्बन्धिसहायरिपुतस्कराः। साहसी दृष्टदोषश्च निर्द्धूताद्यास्त्वसाक्षिणः”। स्त्री प्रसिद्धा। बालोऽप्राप्तव्यव०